# ब्रह्माण्डमण्डलपरिज्ञानम् (४)

**डॉ. रामदेव साहू**
प्रोफेसर एवं विभागाध्यक्ष (वेदविज्ञान)
विश्वगुरुदीप आश्रम शोध संस्थान, जयपुर (राज.)

***(गतांकादग्रे)***

अथेन्द्रप्राण आयुरात्मा। सर्वेषामेषां भूतभौतिकजातानां प्राणिनां विज्ञानान्यात्मानोऽमी आयुषः सम्भवन्ति। 'अरा इव रथनाभौ यत्रोपसृष्टेभ्यः पञ्चदेवेभ्यो वाक् प्राण चक्षुः श्रोत्राणि प्राणाश्च आविर्भवन्तो लक्ष्यन्ते स आयुरात्मा। स इन्द्रः। यज्ञो वा आयुरिति।'[1] अत्र यज्ञ इति जीवनप्रक्रियाया एवापरं नाम। इन्द्रियाण्यधिकृत्य सः सम्पद्यमानो भवति, अत एव इन्द्रियाधिष्ठातृत्वात्तस्यैवेन्द्र इत्यपरा संज्ञा। वागादीनां पञ्चानां समष्टिरप्यनेनैव प्रतिष्ठते अतएवायमेवात्मेति। अयमेव च जीवनपर्यायः। इन्द्रप्राणावस्थितिं यावज्जीवनमिति दर्शनात्।

अथ चन्द्रमण्डलेऽपि रेतः श्रद्धा यशश्चेति तिस्रो मनोता उत्पद्यन्ते। रेतश्चान्द्ररसः। चन्द्राद्रीयते इति। यस्यात्मनोंऽशानुपादाय किञ्चिदपूर्वं प्राणि जायते स रेतः सिक् प्रभव इति वा। त्रयो रेतःसिचः सूर्यश्चन्द्रः पृथिवी चेति। अत्र चान्द्ररसो ग्राह्यः। अयं चान्द्ररसः इडया नाड्या गृह्यमाणो भवति। अन्नेनाप्ययं गृह्यमाणो भवति। अन्नं भुक्तं रसादिक्रमेण शुक्रं भूत्वा चान्द्ररसं शरीरिणं कुरुते। अर्थात् इडया नाड्या गृह्यमाणश्चान्द्ररसः यदा अन्नरसेन संपृक्तो भवति, तदा शुक्रमुत्पद्यते। अतएव शुक्रमपि रेतः पर्याय एवोच्यते। अस्मिन् शुक्रेऽहरहश्चान्द्रं सहोऽनुवर्तते। शरीरस्थो महानात्मा शुक्रे प्रतिष्ठिते तदुत्क्रमणे चोत्क्रमते। शुक्रस्य रेतस उत्क्रमणस्वाभाव्यात्। मूलतस्तु रेतः क्षर आत्मैव। प्रजासृष्टेः षट्पर्वसु पञ्चममेतत्पर्व। अस्य रेतसश्चतुर्धात्वमुक्तम्। यथा -

**''क्षर आत्मैष रेतस्त्वं पाप्मना यात्यविद्यया।**
**कर्मभेदादिदं रेतश्चतुर्धा प्रतिपद्यते।।**

**अमृतं ब्रह्मशुक्रं च सत्त्वं चेति क्रमाद् भवेत्।**
**नातोऽन्यद् वर्तते किञ्चिद् यदिदं दृश्यते जगत्।।[2]''**

रेतः स्वमूलस्वरूपे अमृतम्। तच्च पारमेष्ठ्यो रसः। सूर्यात्सिक्तः सूर्यरसो ब्रह्म, बृंहणशीलत्वात्। चन्द्रात्सिक्तश्चान्द्ररसः शुक्रम् शोचिष्मत्त्वाद्दीपनकरत्त्वाच्च। पृथिव्या सिक्तः पार्थिवो रसः सत्त्वम् प्राणिशरीरम्। सत्त्वे

प्राणिशरीरे शुक्रं प्रतिष्ठति। शुक्रे चान्द्ररसे सूर्यरसरूपि ब्रह्म प्रतिष्ठते। ब्रह्मणि सूर्यरसे च अमृतं प्रतिष्ठते।

अथ श्रद्धोच्यते। श्रतो धानं श्रद्धा। 'श्रयते इति श्रत्' इति व्युत्पत्त्या सदाश्रितं वस्तु तत्त्वं वा श्रद्धेत्युच्यते। सा च चान्द्ररसे आपोमये दृढभावबद्धा भवति। अपां चतुर्षु भेदेस्वेषाऽन्त्यभेदरूपा। उक्तं च - अम्भः मरीचिः मरः श्रद्धा इत्येताश्चतुर्विधाआपः। आसु चन्द्ररश्मिमया सौम्याः आपः श्रद्धा। यतो हि चान्द्ररसस्य सोमस्य चोत्पत्तौ श्रद्धैव हेतुः। उक्तञ्च पञ्चाग्निविद्याप्रकरणे -

**''असौ वाव आदित्योऽग्निः तस्याऽऽदित्य एव समित्।**
**तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति।**
**तस्या आहुतेः सोमो राजा सम्भवति।।**[3]''

श्रद्धा चेयं मनोनिष्ठा। चान्द्ररसान्तर्निष्ठसहोद्रव्याणामात्मन्याधानं कृत्वैषा मनसा तानि सहोद्रव्याणि रेतः (शुक्रं) प्रापयति। सहोद्रव्यैरेव रेतः प्रजोत्पादने समर्थो भवति। एवं चेच्छ्रद्धायाः महान् प्राण्युपकारः। एवमियं सूत्रानुबन्धिनी। मूलतः आप्त्वाच्च मेध्या अर्थात् संगमनीया। एवमियमेव च पितृप्राणानामधिष्ठात्री। आलक्ष्यरूपाप्येषा श्रद्धा पार्थिवप्राणिनां चन्द्रलोकस्थैः पितृभिः सम्बन्धं विज्ञापयति। श्रद्धासूत्रेणैव पितर अनुबद्धा भवन्ति। ते च चान्द्ररश्मिनिष्ठाः। चन्द्ररश्मीणां परिपोषेणैव पितरो बलीयांसो भवन्ति। परिपोषमाप्तैः च रश्मिभिः शरीरस्थाः पितृप्राणा अपि वीर्यवन्तो भवन्ति। अतएव चन्द्ररश्मिपरिपोषाय श्राद्धं सूर्यरश्मिपरिपोषाय बलिवैश्वदेवं च विधीयते।

अथ यशः। कर्मणि निष्ठापन्ने यशः आधीयते। तस्य यशसश्चिन्निष्ठत्वात्कर्मणश्चिन्मूलत्वमुपपद्यते। चिच्चेदं चन्द्रगृहीतसौररश्मीणां प्रत्यादाने प्रतिष्ठितं भवति। चयनाच्चिदिति संज्ञा। सौररश्मीश्चिनोतीति। तासां रश्मीणां प्रत्यादानेनैव प्राणिशरीरेऽपि चिदुत्पद्यते। तदेव प्राणिनां कर्मसु प्रेरकं भवति। तद्वशादेव विहित कर्माणि कुर्वाणः प्राणी यशस्वी भवति। अतएवोक्तं श्रीमद्भगवद्गीतायाम्-

**'यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।**[4]'

विहितं कर्मएव धर्म। तन्निर्देशमुक्तवान् वैशेषिके कणादः-

**'अपां संघातो विलयनं च तेजः संयोगाद्'**[5] इति सूत्रेण।

अत्रोक्तं यत् योऽग्निरप्सु प्रविष्टः सन् जले द्रवभावं विधत्ते, स अग्निः तत्र स्वरूपधर्मेण प्रविष्टो भवति। सोऽयमग्निस्तदानीमात्मनस्तापधर्मं विहाय जलस्यात्मा भवति। तद्विनाशे जलस्वरूपनाशः, तत्सत्तायां च जलस्थितिः।

पुनरपि वह्निसंयोगाज्जलमुष्णं जायते। सोऽयमूष्मा अग्नेरागन्तुको धर्मः। यदि अस्य आगन्तुकधर्मभूतस्य बहिरग्नेरप्सु आत्यन्तिकं सम्बन्धो जायते, तदा तु जलपरमाणवो विशकलिता भूत्वा वाष्परूपे परिणताः सन्तः उत्क्रान्ता भवन्ति। अस्याम् अवस्थायाम् एष आगन्तुको धर्मो जलस्वरूपविनाशे प्रवृत्तः सन् अधर्म एव। इत्थं स्वभावभूतधर्मानुकूला क्रियैव धर्मः। स्वभावभूतधर्मप्रतिकूला क्रिया तु सर्वथाऽप्यधर्म एव। एवं च पूर्वोक्तमिदमेव वस्तुधर्मवृत्तं प्राणिधर्मविषयेऽपि ग्राह्यम्। तथा हि मनुष्येषु यन्मनुष्यत्वं नाम तद् यादृशैर्व्यापारैर्यादृशैश्च द्रव्यसम्बन्धैरवस्थाप्यते ते मनुष्याणां धर्माः। तैरेव तदीयं यशः प्रतिष्ठते।

चन्द्रः वर्षपर्यन्तं या सौररश्मी आददते, तेनैव तदीयं यशोरूपं तेजः प्रतिष्ठते, तत्र चतुर्णां देवानां योगदानं भवति। अथोक्तं ताण्ड्यब्राह्मणे -

**'अग्निः इन्द्रः वायुः मखश्चेति चत्वारो यशःसत्रिया देवाः'**[6] इति।

**अग्न्यादयश्चैते चत्वारः सोमं रक्षमाणाः यशः प्रतिष्ठापयन्ति।**[7]

अथ पृथिवीमण्डलेऽपि वाग् गौ द्यौरिति तिस्रो मनोता उत्पद्यन्ते। पृथिवीमण्डले या वाक् सा अग्निरेव। अतएवोक्तमेतरेयोपनिषदि - 'अग्निर्वाग्भूत्वा मुखं प्राविशत्।' इति। इयं वाक् अन्नप्रसवा। मैत्रायणीश्रुतौ अस्याः स्वरूपं विवृण्वानो महर्षिराह - ''अन्नं वै वाजः। वाग्घि वाजस्य प्रसवः। सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एषु लोकेषु त्रीणि तुरीयाणि। पशुषु तुरीयम्। या पृथिव्यां साऽग्नौ सा रथन्तरे।'' इति। अर्थात् पृथिव्यां या वाक् प्रतिष्ठते, सा अन्नबलेनैव बलीयसी भवति। इयं प्राणगर्भिता मनोमयी चेत्युक्ता। यथोक्तम् महर्षिकुलवैभवे-

**''आच्छन्दिता वाङ्मनसा विना कृता**
**विज्ञानमाच्छन्दितमस्ति तन्मनः।**
**वागेव या प्राणमयी मनोमयी**
**मर्त्यामृताच्छन्दनमेति नो मनः।।**[8]

इयं वाक् वर्णध्वनिरूपैश्च्छन्दोभिः आच्छन्ना भवति। मनसश्च वाचश्च अविनाभावसम्बन्धः। यदा विज्ञानमपि आच्छन्दितं भवति (ऐन्द्रिकचेष्टादिभिराच्छन्नं भवति) तदा तत् मन इत्युच्यते। वागनुबद्धत्वात् आच्छन्दितत्वाच्च द्वैधीभावङ्गतं मनःप्रवृत्तिं दर्शयति। प्रवृत्तौ अन्तर्हेतुर्मनः बाह्यहेतुर्वाक् चेति विज्ञापितं भवति।

पृथ्वीमण्डले लोकत्रयावस्थानात् पृथिव्यां पशुषु (प्राणिषु) या वाक् सा तुरीया (वैखरी) वाक् सम्मता। मध्यमस्थानीये अन्तरिक्षे या वाक् सा मध्यमा। या च ऊर्ध्वस्थानीये द्यवि विद्यते, सा वाक् पश्यन्ती। लोकत्रयात् परेषु

उर्ध्वलोकेषु या वाक् सा परा वाक् उक्ता। एवं वाचश्चतुर्धात्वम्। आसु तुरीया वागग्नेरायत्ता। मध्यमा वाग्वातायत्ता। पश्यन्ती वाक् इन्द्रायत्ता। परा वाक् ब्रह्मायत्ता। अग्नेरायत्तत्वात्पृथिव्याः प्राणिनां वाक् तुरीयैव संभवति । उक्तं च ऋक्संहितायाम् -

**'चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति।।'**[9]

गौरिति द्वितीयः पृथिवीरसः। अयं हि पृथिव्या उत्थाय दिवं यावदभिव्याप्तः सर्वान्नानामुत्पत्तावुपादानभूतो गौरित्युच्यते। उपादानकारणे गोशब्दः 'ततो या योनिरुदशिष्यत सा गौरभवत्।' योनिर्वै नामैष इति मैत्रायणीश्रुतेः। गवामन्नरसोपनायकत्वाच्चान्नत्वम्। ज्योतिर्गौरायुरिति त्रिरसस्य सूर्यस्य गोभ्यः सर्वे रसाः सर्वाण्यन्नानि पृथिव्यामुत्पद्यन्ते तानिन्द्रो भुंक्ते। अयमेव यज्ञः। अस्मादेव चेयं पृथिवी अप्युपलक्षणतया गौरित्युक्ता। यथा यजुःसंहितायास्तृतीयाध्याये-

**'आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः।'**[10]

अत्र पृश्निः अन्नम्। पृश्निशब्दस्यान्नवाचकत्वं स्वीक्रियत इति विषये महाभारतकारः शान्तिपर्वण्युल्लिखति -

**'पृश्निरित्युच्यते चान्नं वेद आपोऽमृतं तथा।**
**ममैतानि सदा गर्भः पृश्निगर्भस्ततोऽस्म्यहम्।।**[11]**'**

छान्दोग्योपनिषद्यपि तेजोऽबन्नानां सृष्टिकथने अन्नशब्देन पृथिवी निर्दिष्टा। अतोऽत्रापि मन्त्रे पृश्निर्नाम सर्वेषां भूतानां प्राणरक्षकतयाऽन्नभूता गौः पृथ्वी, पुरः = पूर्वतः एव, मातरं = मानदण्डभूतं (स्वमक्षदण्डम्) असदत् = संतिष्ठते, अक्रमीत् = परिभ्रमति च। पुनः यं पितरं = स्वजननकं सूर्यं प्रयन् = द्युलोकमाक्रामती सती, आ = परितः, अक्रमीत् = आवर्तते स्म। एवं गतिद्वययुता पृथिवी एव क्वचिदुपलक्षणया गौरित्युक्तेति नास्ति काचिद् विप्रतिपत्तिः।

द्यौरिति तृतीयः पृथिवीरसः। येनेयं पृथिवी आत्मानं द्योतते तद् द्यौरिति। अयमेव वैश्वानरः। स्वरूपतस्तु सोऽग्निरेव। द्योतनकर्मत्वाद् द्यौरिति संज्ञा। अग्निः चित्य-चितेनिधेयभेदाद् द्विविधः। पृथिव्याम् अन्तरिक्षे दिवि च क्रमशः प्रतिष्ठितस्याग्नेः वायोरादित्यस्य च परस्परं संघर्षादुत्पन्नः तापधर्माऽग्निर्वैश्वानरः। पृथिवी इत्येकं विश्वम्। अन्तरिक्षमिति द्वितीयं विश्वम्। द्युलोकश्चेति तृतीयं विश्वम्। एष्वेव त्रिष्वधिष्ठातृत्वेन अग्निवाय्वादित्याः प्रतिष्ठिताः। यथोक्तं यास्केन निरुक्ते दैवतकाण्डे -

**'अग्निः पृथिवीस्थानः वायुर्वेन्द्रोवाऽन्तरिक्षस्थानः सूर्यो द्युस्थानः इति।**[12]**'**

एता अग्निवाय्वादित्याख्यास्तिस्रो देवता वैश्वानराग्नेराधारभूताः सन्ति। अस्य वैश्वानरत्वमेवमाचष्टे - 'विश्वेषां

नराः विश्वानराः विश्वानरेभ्यो जातोऽग्निर्वैश्वानरः' इति। अनेन लोकत्रयावच्छिन्नस्याग्ने प्राणापानव्यानमूर्त्तित्वं तापधर्मात्वञ्चोपपद्यते। शतपथब्राह्मणेऽपि अग्नेर्लोकनादेव लोकानां लोकत्वमभ्युपगतम्। यथा -

**'स यः स वैश्वानरः। इमे स लोकाः। इयमेव पृथिवी विश्वमग्निर्नरः।**

**अन्तरिक्षमेव विश्वं वायुर्नरः। द्यौरेव विश्वमादित्योनरः।**[13]'

अयमेव वैश्वानराग्निर्याज्ञिकैश्चित्याग्निरित्युच्यते। अयं वैश्वानरः यदा पृथिव्या रश्मिभिर्निस्सृतः पृथिव्या वायुमण्डले संस्थितः सूर्यरश्मिभिः सम्पृक्तो भवति, तदा पृथिवीरसरूपा द्यौर्जायते। द्यौः सुरासुराणां प्रतियोगिभावेन ग्राह्या भवति। अस्मिन् विषये इदं ज्ञातव्यं यत् पृथिव्याः स्वे रश्मयः तामसत्वादसुरा भवन्ति, किन्तु सूर्याहिता रश्मयः पृथिव्याघातेन प्रतिफलिता दीप्यमानत्वात् देवाः इत्युच्यन्ते। प्राणिप्रसवयोग्यत्वाद्रमणीयत्वाच्च त एव सुरा इत्यपि कथ्यन्ते। एत एव पार्थिववायुमण्डलान्तर्गतं ताः वैश्वानरस्य द्यौस्त्वं सान्वर्थं विदधति।

**सन्दर्भाः**

1 ताण्ड्य ब्रा.-6/4/4)
2. देवतानिवित्-8/4/2,3
3. छांदोग्योपनिषद्-पञ्चाग्निविद्याप्रकरण / पृ. 137-138
4. श्रीमद्भगवद्गीता-16/23
5. वैशेषिकसूत्रम् पृ. 43
6. तांड्.ब्रा.-7/5/6
7. महर्षिकुलवैभवम् / पृ.5
8. महर्षिकुलवैभवम्/पृ.53
9. ऋग्वेद -1/164/45
10. शुक्ल यजुर्वेद 3/8
11. महाभारत-शान्तिपर्व
12. निरुक्त - दै. कां. - 7/5
13. श.बा.-9/3/1/3